**संस्कृत वार्ता:**

**दिनाङ्क : 19/05/2026** **सायम् - 06:20**

**आदौ मुख्यवार्ता:**

- प्रधानमन्त्री नरेन्द्रमोदी ओस्लो-नगरे तृतीये भारत-नार्डिक् शिखरसम्मेलने भागं भजितवान्, यस्य उद्देश्यं प्रौद्योगिकी-पुनर्नवीकरणीय-ऊर्जा-रक्षा-व्यापारक्षेत्रेषु सहकारं सुदृढी करणम् अस्ति।
- प्रधानमन्त्रिणा मोदिना स्वीडन-देशस्य समकक्षीयेन उल्फ क्रिस्टर्सन् इत्यनेन सह संयुक्त-लेखे वैश्विक-अनिश्चिततावधौ सहभागितायाः विषये अवधानं प्रदत्तम्।
- सर्वोच्चन्यायालयेन, मानवजीवनस्य सार्वजनिकसुरक्षायाः च आवश्यकताम् उल्लिखन्, उन्मत्तानां, असाध्यरोगिणां, अथवा प्रत्यक्षतया अपायकारिणां मार्गभ्रष्ट-शुनकानां कृते प्रथमवारं यूथेनेशिया माध्यमेन मृत्योः अनुमतिः प्रदत्ता।

**अपि च**

- आई. पी. एल. क्रिकेट्-क्रीडायां, अद्य सायङ्काले जयपुरे, राजस्थान-रायल्स्-दलं, लखनऊ-सुपर्-जायण्ट्स्-दलं सम्मुखी करिष्यति।

**अथ वार्ता: विस्तरेण**

**भारत-नार्डिक शिखरसम्मेलनम्**

तृतीयं भारत-नार्डिक शिखरसम्मेलनम् अद्य नार्वे-देशस्य राजधान्यां ओस्लो-नगरे समारब्धम्। प्रधानमन्त्रिणा नरेन्द्रमोदिना सह नार्वे, स्वीडन, आइसलैंड, फिन्लैण्ड, डेन्मार्क इत्येतेषां समकक्षिभिः सह अस्मिन् शिखरसम्मेलने भागं स्वीकृतम्। द्वाविंशत्यधिक द्विसहस्रतमे वर्षे डेन्मार्क-देशस्य कोपेनहेगन-नगरे आयोजितस्य पूर्व-शिखरसम्मेलनानन्तरं भारत-नार्डिक-देशानां मध्ये क्षेत्रीय-सहकारं सुदृढीकरणम् अस्य सम्मेलनस्य उद्देश्यम् अस्ति। तन्त्रज्ञानं नवान्वेषणं च, सुस्थिरता, पुनर्नवीकरणीय-ऊर्जा, डिजिटलीकरणं च अस्य सम्मेलनस्य प्रमुखानि क्षेत्राणि सन्ति। व्यापार-आर्थिक-सहभागित्व-सन्धिना, टी. ई. पी. ए. इत्यनेन सह, अधुना प्रवृत्तेन, शिखरसम्मेलनेन भारत-नार्डिक-क्षेत्राणां मध्ये व्यापार-निवेश-सम्बन्धाः अपि सुदृढाः भविष्यन्ति इति अपेक्षा अस्ति। नार्डिक-समूहेन सह भारतस्य द्वैपाक्षिकव्यापारः सम्प्रति प्रायः एकोनविंशति बिलियन-डालर-मितम् अस्ति। अनेन शिखरसम्मेलनेन भारत-नार्डिक-देशयोः मध्ये बहु-पक्षीय-सहकारस्य विस्तारः भविष्यति तथा च परस्पर-हितस्य क्षेत्रीय-वैश्विक-विषयेषु चर्चायाः अवसरः प्राप्यते इत्यपि अपेक्षा अस्ति। शिखरसम्मेलनात् पूर्वं प्रधानमन्त्री मोदी आइसलैण्ड-देशस्य प्रधानमन्त्रिणा, फिनलैण्ड-देशस्य प्रधानमन्त्रिणा, डेन्मार्क-देशस्य प्रधानमन्त्रिणा च सह द्वैपाक्षिक मेलनं कृतवान्।

प्रधानमन्त्री मोदी यू. ए. ई., नीदरलैन्ड्स्, स्वीडन देशानां भ्रमणं समाप्य ह्यः नार्वे-देशं सम्प्राप्तवान्। गतसायं सः क्राउन प्रिन्स हकोन तथा नार्वे-देशस्य प्रधानमन्त्रिणा जोनास गहर स्टोर इत्युभाभ्यां सह भारत-नार्वे व्यापार-अनुसन्धान-शिखरसम्मेलने भागं भाजितवान्। वाणिज्य-अनुसन्धान-समुदायं सम्बोधयन्, प्रधानमन्त्री श्रीमोदी, व्यापार-आर्थिक-सहभागित्व-सन्धेः प्रभावात् परं द्वैपाक्षिक-व्यापारस्य निवेशस्य च वृद्धेः प्रशंसाम् अकरोत्। सः अधोरेखितवान् यत् उभयोः पक्षयोः हितधारकाः शतं बिलियन् यू. एस्. डालर् इत्यस्य निवेशलक्ष्यं साधयितुं प्रयत्नान् कुर्युः, परिणामतः

भारते दशलक्षाणि यावत् वृत्त्यवसराणां सृजनं च करणीयम्। प्रधानमन्त्री श्रीमोदी स्वस्य पञ्चराष्ट्राणां यात्रायाः पञ्चमान्तिमे चरणे च अद्य इटलीदेशं गमिष्यति।

**भारत-स्वीडन्-लेखम**

भारत-स्वीडन्-देशौ वैश्विक-अनिश्चिततायाः क्षणे सहकारः सहभागी-समृद्धेः, सुस्थिरस्य भविष्यस्य च मार्गम् निर्धारणाय अवधानं दत्तवन्तौ। प्रधानमन्त्रिणा नरेन्द्रमोदिना तस्य स्वीडन्-देशस्य समकक्षीयेण उल्फ क्रिस्टर्सन इत्यनेन च लिखिते लेखे वैश्विक-अनिश्चिततायाः, ऊर्जा-असुरक्षायाः, आर्थिकविभाजनस्य च समये, विश्वं एकाकीभूय कार्यं कर्तुं अन्ताराष्ट्रियसहभागित्वं सुदृढं कर्तुं वा चयनं कर्तव्यम् इति अवधानं दत्तवन्तौ। अद्य राष्ट्रिय-दैनिक-पत्रिकायां प्रकाशिते लेखे, उभौ प्रधानमन्त्रौ उक्तवन्तौ यत् संयुक्तराष्ट्रसङ्घः स्वस्य अशीतितमं वार्षिकोत्सवम् आचरति, अतः अन्ताराष्ट्रियसहयोगस्य बहुपक्षवादस्य च मूल्यं इतोऽपि स्पष्टम् अभवत्।

**सर्वोच्चन्याया लयः**

सर्वोच्चन्यायालयेन, मानवजीवनस्य सार्वजनिकसुरक्षायाः च आवश्यकताम् उल्लिखन्, उन्मत्तानां, असाध्यरोगिणां, अथवा प्रत्यक्षतया अपायकारिणां मार्गभ्रष्टशुनकानां कृते प्रथमवारं यूथेनेशिया माध्यमेन मृत्योः अनुमतिः प्रदत्ता। न्यायाधीशः विक्रम नाथः, न्यायाधीशः सन्दीप मेहता, न्यायाधीशः एन्. वी. अञ्जारिया इत्येतेषां पीठेन सम्पूर्णे देशे वर्धमानानां स्वामिविरहितानां शुनकानां संख्यां निवारयितुं निर्देशाः प्रादत्ता। न्यायपीठेन उक्तं यत् यत्र यत्र स्वामिविरहितानां शुनकानां सङ्ख्या चिन्ताजनक-स्तरम् अवाप्नोत् तथा च यत्र पुनः पुनः शुनकानां दंशः वा आक्रामक-आक्रमणानि जनसुरक्षायै विभीषिकां जनयन्ति तत्र नगरपालिकाः मृत्योः आश्रयं स्वीकर्तुं शक्नुवन्ति। गतवर्षस्य जुलाई-मासस्य अष्टाविंशति दिनाङ्के आरब्धे

प्रकरणे अयं आदेशः प्रसारमाध्यमानां प्रतिवेदनेषु, विशेषतः राष्ट्रिय-राजधान्यां बालानां मध्ये, स्वामिविरहितानां शुनकानां दंशनस्य, रेबीज इति रोगस्य च घटनाः प्रकाशमानाः आसन्। एतदतिरिच्य, सर्वोच्चन्यायालयेन स्वामिविरहितानां शुनकानां स्थानान्तरणस्य प्रजननावरोधस्य च विषये पूर्वतनस्य आदेशस्य पुनरावेदनस्य याचिका निरस्तिकृता, सः अवदत् यत् गौरवपूर्वकं जीवनस्य अधिकारे शुनकानां दंशनस्य आक्रमणात् हानिकरं भयं विना स्वतन्त्रतया भ्रमणस्य अधिकारः अन्तर्भवतीति।

**<u>पीयूषगोयल:</u>**

केन्द्रीय-वाणिज्य-उद्योग-मन्त्री पियूष-गोयलः अद्य उद्यम-सर्वकारयोः मध्ये व्यापारे सुगमतां वर्धयितुं, भारते प्रतिस्पर्धात्मकतां वर्धयितुं, विकसित-भारतम् प्रति देशस्य यात्रां च त्वरितं कर्तुं प्रगाढसहयोगस्य आह्वानम् अकरोत्। नव दिल्ल्यां षड्विंशत्यधिक द्विसहस्रतम वर्षस्य भारत-व्यापार-परिष्कार-शिखरसम्मेलने मन्त्री भाषमाण: आसीत् । श्रीगोयलः अवदत् यत् वर्तमान-वैश्विक-परिस्थितिः भू-राजनैतिक-अनिश्चितताः च भारतस्य कृते व्यापार-प्रक्रियां सुदृढं कर्तुं, द्रुततर-परिष्कारान् स्वीकर्तुं, महत्तर-स्थितिस्थापकतायाः निर्माणं कर्तुं, आपूर्तिशृङ्खलाः सुदृढां कर्तुं च अवसरत्वेन द्रष्टव्यम्।

**<u>पुतिन-चीन</u>**

रूस देशस्य राष्ट्रपतिः व्लादिमिर पुतिनः चीनदेशस्य राष्ट्रपतिना षी चिन्पिङ्ग-वर्येण सह मेलनं करिष्यति। क्रेमलिन इत्यस्य अनुसारं, उभौ नेतारौ आर्थिकसहयोगस्य विषये, प्रमुखेषु प्रादेशिक-वैश्विक-विषयेषु च चर्चां करिष्यतः। एषा यात्रा चीन-रशिया मैत्री-सन्धेः पञ्चविंशति वर्षाणाम् उपलक्ष्ये आचर्यते। एषा वार्ता तदा अभवत् यदा वैश्विक-भूराजनैतिक-संघर्षस्य मध्ये चीनदेशः अमेरिकादेशेन रूसदेशेन च सह स्वस्य सम्बन्धान् सन्तोलयति । युक्रेन्-द्वन्द्वस्य विषये पाश्चात्य-प्रतिबन्धाणाम् अनन्तरम्

अपि चीनदेशः रूसदेशस्य बृहत्तमः वाणिज्यिक सहभागि:, रूसदेशस्य तैल-प्राकृतिकेन्धनस्य प्रमुखः क्रेता च अस्ति।

**<u>आई. पी. एल.</u>**

आई. पी. एल. क्रिकेट्-क्रीडायां अद्य सायं सार्द्ध सप्तवादने जयपुरे राजस्थान-रायल्स-दलं लखनऊ-सुपर-जायण्ट्स-दलं सम्मुखी करिष्यति। रायल् चैलेंजर्स बेङ्गलुरु, गुजरात् टाइटन्स , सन राइजर्स हैदराबाद च पूर्वमेव प्ले-आफ् क्रीडायां प्रविष्टवन्तः, मुम्बई इण्डियन्स, लखनऊ सुपर जायण्ट्स दले स्पर्धातः बहिः गतवन्तौ। पञ्जाब किङ्ग्स, राजस्थान रायल्स, चेन्नई सुपर किङ्ग्स्, दिल्ली कैपिटल्स, कोलकाता नाईट राईडर्स दलानि अधुनापि अन्तिमस्थानार्थं स्पर्धायां सन्ति।

**।। इति वार्ता: ।।**